M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1253

Title: Baudhayana Sutra

1253

InComplete

	Baudhayan Sutra	Title
		Author
		Editor
		Year, Vols.
		Publisher
1253	(Damaged)	Remarks

श्रीगोपालाय नमः॥ ॥ॐ पशुना यक्ष्यमाणो भवति स उपकल्पयते यौ तु द्वावन्यपरिधी त्र गुग्गुलु सुगंधिते
जनं शुक्लामूर्णास्तुकां याप त्वष्टारा श्रृंगे द्वे रशाने द्विगुणां त्रिगुणां च द्वे वपाश्रपणी विशाखां चाविशाखां स्वरु
हृदयशूलं काष्मर्यमयान्परिधीनौदुंबरं मैत्रावरुणदंडं सुखेन संमितमिध्मा बर्हिरिध्मं प्रणयनीयं कृष्णशा
खामिडसूनं यवान्यवमतीस्पः सक्तुसरितहोमा यपृषदाज्याय दधि हिरण्यमित्यथामावास्येन हविषे
ष्ट्वा नक्षत्रे वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा पंचहोतारं मनसानुद्रुत्याहवनीये जुहो
त्यथा रथ्ये यजमाने स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा यूपाहुतिं जुहोत्युरु विष्णो विक्रमस्वोरुक्षयाय नस्कृधि घृतं
घृतयोने पिब प्रप्रयज्ञपतिं तिरस्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाथ पाचत्याज्यस्थालीं स स्रुवां बर्हिर्हिरण्यमु
दपात्रं कृपंति तक्षाणं स परशुमेहि यजमानेति पूर्वया द्वारोपनिष्क्रम्य तां दिशं यंति यत्रास्य यूपः स्यष्टो
भवति यत्र वा वेत्स्यन्मन्यते स यः समे भूम्यै स्वाद्योनेरूढो बहुपर्णो बहुशाखोऽप्रतिशुष्काग्रः प्रत्यगुपनतस्तमुप
तिष्ठतेत्यन्याननागानन्यानुपागान र्वाक्त्वा परैरविदं परोऽपरैस्तां त्वा वृणते वैष्णवं देवयज्याया इत्यथैनमान
क्ति देवस्त्वा सविता मध्वानक्त्विति सूर्ध्वाग्रं बर्हिरन्तर्धाय त्वौषधे त्रायस्वैनमिति स्वधितिं तिर्यंचं प्रहरति स्वधि
ते मैनं हिंसीरिति यः प्रथमः शकलः परापतति तं प्रज्ञातं निदधाति तमपरिभिंदन्नन्तःसंगं वृश्चति प्रांचं
वोदंचं वा प्रयांतमनुमंत्रयते दिवमग्रेण मा लेखीरंतरिक्षं मध्येन मा हिंसीः पृथिव्या संभवेत्यथावृश्चनेन
हिरण्यं निधाय संपरिस्तीर्याभिजुहोति वनस्पते शतवल्शो विरोह स्वाहेति सहस्रवल्शा वि वयं रुहेमेत्यात्मा
नं प्रत्यभिमृशते न च यं शाखाः प्रसृदयति यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगायेति पंचारत्निं

तस्मै स्फ्य इत्येष ब्राह्मणं वत्तामवमस्तं परिग्रहं गपरमं प्रादेशावमं च पालस्य काले परिवासयत्य छिन्नो रायः सु
वीर इति यत्स्तंभ बतितस्य चतुरंगुलं च षालाय प्रछेदयति तं चतुरश्रिं वाष्टाश्रिं वा कृत्वा वा हरयत्वोह
मिति स्ति घ्रत्यवत द्गणानामेव स्वरू ५ रितथास्येणा पूर्वेद्युरेव पाश्वं वेधिकी वेदिर्विमिता भवति दशपदा प्राक्ति स्प
रश्चीह्वा दशपदा प्राच्यष्टापदा पुरस्तात्तिरश्चीतां परिस्तीर्यत्ते वयजुर्हरति ॥१॥ इदमेव प्रसिद्धं पौरोडाशिकं
त्रिर्यजुषा तूष्णीं चतुर्थं पूर्वं परिग्राहं परिगृह्य लातिकरणं जपत्युद्धत्य द्भुतादाग्नीध्रस्त्रिर्हरत्यथ यावतिस्फ्यमुद्धा
त्रं बर्हिः शम्यामित्येतत्समादाय हैहि यजमानेत्युत्तरेण वेदिं द्वयोर्वा त्रिषु वा प्रक्रमेषु स्फ्येनोद्धत्यावोक्ष्य शम्यया
वात्वालं परिमिमीते वित्तायनी मेसीति पुरस्तादुदीचीनकुंबांतरतः स्फ्येनालिखति तिक्तायनी मेसीति दक्षिणतः
प्राचीनकुंबांतरं स्फ्येनालिखत्यवतान्मानाथितमिति पश्चादुदीचीनकुंबांतरं स्फ्येनालिखत्यवतान्मा व्यथित
मित्युत्तरतः प्राचीनकुंबांतरं स्फ्येनालिखत्यथ चात्वाले बर्हिर्निधाय तस्मिन्स्फ्येन प्रहरति विदेरग्निर्नभो नामा
ग्ने अंगिरो यो स्यां पृथिव्यामसीत्यायुषा नाम्नेहीति हृत्वोत्तरवेद्यां निवपति यत्तेनाधृष्टं नाम यज्ञियं
पा तेन त्वादध इति द्वितीयं प्रहरति विदेरग्निर्नभो नामाग्ने अंगिरो द्वितीयस्यां पृथिव्यामसीत्यायुषा ना
म्नेहीति हृत्वोत्तरवेद्यां निवपति यत्तेनाधृष्टं नाम यज्ञियं तेन त्वादध इति तृतीयं प्रहरति विदेरग्नि॰ अंगिरो
य स्तृतीयस्यां पृथिव्यामसीत्यायुषा नाम्नेहीति हृत्वोत्तरवेद्यां निवपति यत्तेना॰ त्वादध इति तूष्णीं च
तुर्थं ५ हरति सह बर्हिषाथाध्वर्युः स्फ्येन चात्वालात्पुरीषमुद्धत्यथाग्नीध्रमाहाग्नीदिति त्रिर्हरेति ततस्त्रिरग्नी
ध्रो हरति यदाग्नीध्रस्त्रिर्हरत्यथाध्वर्युरुत्तरवेद्यै पुरीषं ५ संप्रयौति सिं ५ हीरसि महिषीरसीति प्रथयत्युरु

प्रथस्वोरु ते यज्ञपतिः प्रथतामिति स्फ्येन संहंति ध्रुवासीत्यथैनामद्भिरवोक्षति देवेभ्यः शुंधस्व देवेभ्यः शुंभस्वेति
सिकताभिरनुप्रकिरति तां प्रादेशमात्रीं चतुरस्रां निधाय दास्यथा परिमिमीते तस्यै तन्नाभिमुत्सादयत्येनां प्रति
छायाग्नि मा दन्नेदेव स्पत्वा॰ मादद इत्यादायाभिमंत्रयते त्रिरसि नारीरसीति तया पूपावटं परिलिखत्यथां त
र्वेद्यर्धं स्याद्ब्रह्मवेद्यर्धं परिलिखितं ५ रक्षः परिलिखिता अरातय इदमहं ५ रक्षसो ग्रीवा अपिकृंतामि यो स्मान्द्वेष्टि
यं च वयं द्विष्म इदमस्य ग्रीवा अपि कृंतामीत्यथाग्नीध्रमाहाग्नीदेहीमं पूपावटं खनेत्प्राक्पुरीषमुद्वपतात्तत्तु रेयु
जेनापरमतिखनतादिति तं खनति खनयति वा ॥२॥ यावद्देवात्राध्वर्युश्चेष्ट ×परसंभितं× तितावदेव प्रति प्र
स्कातात्पादधातीध्मं प्रणयनीयमुपो पयमनीः कल्पयंति चात्वालाद्दाक्षिणेनेंद्रघोषवतीः प्रोक्षणीरध्वर्युरादत्ते
परिक्रम्यैणोपं स्तृहीतमाज्ये प्रयच्छति ब्रह्माणि संभाराणवेत्यथ संप्रेष्यमाहाग्नये प्रणीयमानायानुब्रूह्यग्नीद
कस्फ्य यानुसंधेहीति त्रिरुक्तायामुपयच्छते होतुर्वशं यन्त्युत्तरेण वेदिं प्रतिपद्यते थारयंत्येतमग्निमथाध्वर्युरिं
द्रघोषवतीभिः प्रोक्षणीभिरुत्तरवेदिं प्रोक्षति इंद्रघोषस्त्वा वसुभिः पुरस्तात्पात्विति पुरस्तान्मनोजवास्त्वा
पितृभिर्दक्षिणतः पात्विति दक्षिणतः प्रचेतास्त्वा रुद्रैः पश्चात्पात्विति पश्चाद्विश्वकर्मा त्वादित्यैरुत्तरतः पा
त्वित्युत्तरतोऽत्रय त्प्रोक्षणीनामुच्छिष्येत तद्दक्षिणात उत्तरवेद्यैर्निनयति यद्देवतत्क्रूरं तत्तेन शमयतीति ब्राह्म
णमथैनाः हिरण्यमंतर्धाय प्रोक्षणीया पंचगृहीतेनाघारयति सिंहीरसि सपत्नसाही स्वाहेति दक्षिणेंऽसे
सिंहीरसि सुप्रजावनिः स्वाहेत्युत्तरस्यां श्रोण्यां सिंहीरसि रायस्पोषवनिः स्वाहेति दक्षिणस्यां श्रोण्यां
सिंहीरस्यादित्यवनिः स्वाहेत्युत्तरेंऽसे सिंहीरस्यावह देवान्देवयते यजमानाय स्वाहेति मध्ये प्राञ्चं तेभ्यस्त्वे
ति स्रुवमुद्गृह्णाति पूतुदारुपरिधीन्परिदधाति विश्वायुरसि ध्रुवीद्यैहेति मध्यमं ध्रुवासि दस्यं ता रि

सं दृꣳहेति दक्षिणमनुतक्षि दृꣳसि दिवं दृꣳहेत्युत्तरमथातिशिष्टान्संभारानभिनिवपति गुग्गुलु सुगंधितेजनꣳ शुक्लाम
र्णास्तुकामग्नेर्भस्मास्यग्नेः पुरीषमसीत्यथैनꣳ सꣳस्रावेणाभिघारयत्यथ प्रदक्षिणमावृत्य धर्मं प्रतिष्ठापयति यज्ञ
प्रतितिष्ठ सुमतौ सुशेवा आ त्वा वसूनि पुरुधा विशंतु दीर्घमायुर्यजमानाय कृण्वन्नथामृतेन जरितारमङ्ग्धी
त्यथैनं विस्रस्याकृतिषाहं कृत्वा ध्रुवाकृतिभिरभिजुहोति ॥ २ ॥ अग्निर्यज्ञं नयतु प्रजानन्मैनं यज्ञहनो विदंदेवेभ्यः
प्रज्ञाताद्यज्ञं प्रप्रयच्छ पतिंतिरस्वाहा वायुर्यज्ञं नयतु प्रजानन्सूर्यो यज्ञं नयतु प्रज्ञानन्यज्ञो यज्ञं नयतु प्रजान
न्नित्यथैतां यजमान एव स्वयं जुहोत्यग्निरन्नादोन्नपतिरन्नस्येशे स मे न्नं ददातु स्वाहा वायुः प्राणदाः प्राण
स्येशे स मे प्राणं ददातु स्वाहादित्यो भूरिदा भूयिष्ठानां पशूनामीशे स मे भूयिष्ठान्पशून्ददातु स्वाहेत्यग्निवत्सु
तरं परियाहं परिगृह्य योयुपित्वा तिर्यंचꣳ स्फ्यꣳ स्तब्ध्वा संप्रेषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रु
वः स्वधितिꣳ स्रुचश्च संमृड्ढि पत्नीꣳ संनह्याज्येनोदेह्याज्यं देहीत्याह तासु प्रोक्षणीषु
दस्यस्फ्यं मार्जयित्वेध्माबर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङक्रुत्य स्रुवं च स्रुचश्च संमार्ष्टि तत्पत्नीं घदाज्यस्य
हणीपत्नीꣳ संनह्याज्येनोदेह्याज्यं च प्रोक्षणीश्च प्रस्थापयति इध्मा ज्यानि गृहीत्वा घृताज्यस्य रण्यामुपस्त
णीतेमहीनां पयोसीति विश्वेषां देवानां तनूरिति द्वितीयं बर्हिर्जितं थायथादध्मानयत्य ग्रासमद्य घृतवतीनां
हं घृतवतीनां यहोसीत्यपोद्धत्य बर्हिषीअ थाभिघारयति विष्णोर्हृदयमसीत्येकमिषविष्णु स्त्वानुविक्रम
इति द्वितीयं ॥ ४ ॥ अथ प्रोक्षणीभिरुपोत्तिष्ठती ध्मं प्रोक्षति वेदिं प्रोक्षति बर्हिः प्रोक्ष्याभिवर्हिरासन्नं प्रोक्ष्योपनि
नीय पुरस्तात्प्रस्तरं गृह्णाति पंचविधं बर्हिः स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य काश्मर्यमयान्परिधीन्परि
दधात्यूर्ध्वे समिधावादधाति विधृती तिरश्ची सादयति विधृत्योः प्रस्तरं प्रस्तीर्य जुहूं बर्हिषि तरा एताश्च सद

न्निति समभिमृश्य प्रदक्षिणमावृत्य प्रत्यङ्ङक्रुत्य यावतिषवमती प्रोक्षणीर्बर्हिर्हस्तमाज्यस्थालीꣳ स्रुवꣳ स्व
रुꣳ रशनेमैत्रावरुणदण्डꣳ हिरण्यमुदपात्रमित्येतत्समादाय यूपं प्रक्षालयति यं ते शिक्वः परावधीस्त ताह स्तेनवा
श्या। आ पस्तैत द्वनस्पते नघृतं घृतंशुंधनीरिति यूपएव प्रक्षालित प्रपन्नः प्रागवटादुपशेते तत्तमुत्तरेणाहव
नीयं तिष्ठन्नो प्रोक्षति पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वेत्यवटे पोव ×संपन्नं चषालः × नपति शुंधतां लोकः पि
तृषदन इति यवान्प्रस्कंदयति यवोसि यवयास्मद्द्वेषो यवयारातीरिति बर्हिर्हस्तं व्यतिषज्यावस्तृणाति पितृणा
ꣳ सदनमसीत्यथैनं हिरण्यमंतर्धाय स्रुवाकृत्याभिजुहोति पितृभ्यः स्वाहेति यूपशकलमवास्यति स्व वेशोस्यग्रे
गानेतृणां वनस्पतिरधि त्वा स्थास्यति तस्य वित्तादित्यथाद्द्वा आज्यस्थालीꣳ स्रुवꣳ स्वरुꣳ रशने मैत्रावरु
णदण्डमुदपात्रमित्येतत्समादायाहेहि यजमानेत्यन्वग्यजमानो नूर्वीपत्नी ग्रे न यूपं परीत्य दक्षिणत उदङ्मुखा
स्तिष्ठेति पूर्व एवाध्वर्युरपरो यजमानोपरापन्त्यथ प्रवृत्तचषालं यूपस्याग्रमनक्ति देवस्त्वा सविता मध्वानक्त्विति
तरतश्च बाह्यतश्च स्वभ्यक्तं कृत्वा चषालं प्रतिमुंचति सुपिप्पलाभ्यस्त्वौषधीभ्य इत्यथ स्रुवेणाग्निष्ठामश्रिमभि
घारयत्या हरूपा याज्यमानायानुगृहीत्यंतमनक्तं तमेव यजमानं तेजसानक्तीति नोपरमनक्ति पत्नयुपरमन
क्ति सर्वतः परिमृशत्यपरिवर्गमेवास्मिन्तेजो दधातीति ब्राह्मणमुच्छ्रयन्नाहोच्छ्रीयमाणायानुब्रूहीत्युच्छ्रय
स्वोद्दिवꣳ स्तभानान्तरिक्षं पृण दृꣳहस्व पृथिवीमुपरे णादृꣳहेत्यथैनं वैष्णवीभ्यामृग्भ्यां कल्पयति ते ते धामान्युश्मसि ग
मध्ये प्रपतेति द्वाभ्याꣳ सयत्राग्निष्ठामश्रिमाहवनीयेन संपादयति तत्तत्स्रुवस्य चषालं परेत्य यतित द्विष्णोः
परमं पदꣳ सदा पश्यन्तीत्यथैनं प्रदक्षिणं पुरीषेण पर्यूहति ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिꣳ
रायस्पोषवनिं पर्यूहामीति मैत्रावरुणदण्डेन संदृꣳहति ब्रह्म दृꣳह क्षत्रं दृꣳह प्रजां दृꣳह रायस्पोषं दृꣳहे

बौ॰ सू॰ २ पशु

त्यग्यू नमनति रिक्तं परिव्ययस्योदपात्रमुपनीयाथैतां त्रिगुणां रशनां त्रिः संभुज्य मध्यमेन गुणेन नाभिदघ्ने परिव्य
यन्नाह परिवीयमाणायानुब्रूहीति त्रिः प्रदक्षिणं परिव्ययति परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं रायस्पो
षो यजमानं मनुष्या इत्यूपं तेष्वतिषङ्ग्यां तं प्रवेष्टयत्यपि मतिस्कंदि मत्थवयत्यथो त्तमेन गुणेनाग्निमुग्रामग्नीमध्य
मे खुले स्वरुमवगूहन्संतारि सुस्यत्वासानाथवगूहामी सर्वयूपमुत्सृजति ॥ ५ ॥ अथैतं पशुं पल्यूलितमंतरेणात्वा
त्वालौ कं रौद्रपाघाग्रेण यूपं पुरस्तात्प्रत्यञ्चं स्वमवस्थापयित्वा तिमिषे त्वेति बर्हिषी आदायोपाकरोत्युपवीरस्यु
पो देवान्दैवीर्विशः प्रागुर्वह्नीरुशिजो बृहस्पते धारया वसूनि हव्या ते स्वदतां देवत्वष्टर्वसु रण्व रेवती रमध्वं प्र
जापते जायमानाः प्रजा ज्ञाता यश्च या इमाः तस्मै प्रतिप्रवेदय चिकित्वान् अनुमन्यतां इमं पशुं पशुपते ते अद्य बध्ना
म्यग्ने सुकृतस्य मध्ये अनुमन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यमिमं द्वाग्निष्यां त्वा जुष्टमुपाकरो
मीति यद्देवत्यो वा भवति प्रज्ञाते बर्हिषी निधायाधिमंथनं शकलं निदधात्यग्नेर्जनित्रमसीति वृषणावन्वंचौ
वृषणौ स्थ इत्यथारणी आदत्त उर्वश्यस्यायुरसि पुरूरवा इत्यथैने आज्यस्थाल्याः समनक्ति घृतेनाक्ते वृष
णं दधाथामित्यथ प्रजायैतीर्वाचयति गायत्रं छन्दोनुप्रजायस्व त्रैष्टुभं छन्दोनुप्रजायस्व जागतं छन्दोनुप्रजा
यस्वेत्यथाग्नये मथ्यमानायानुब्रूहीति जातायाह जातायानुब्रूहीति प्रहरन्नाह प्रह्रियमाणायानुब्रूहीति प्र
समन हरति भवतं नः समनसाविति प्रहृत्याभिजुहोत्यग्नावग्निश्चरति प्रविष्ट इत्यथ रशनामादत्ते देवस्य त्वा॰ माददइ
ति तथा दृष्णायापशुमभिदधाति दक्षिणमर्धशीर्षमृतस्य त्वा देव हविः पाशेनारभ इतीति द्विगुणायै वा त्रिगुणायै
वांतौ संदधाति धर्षा मानुषानिति निमुनक्त्यद्भ्यस्त्वौषधीभ्य इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामीति यद्देवत्यो वा
भवत्यपां पेरुरसीति स्वात्तं चित्सदेवं ह॰ × थैनमद्भिः प्रोक्षत्य × माणो देवीः स्वदतैनमिति त्युपरिष्टात्प्रोक्षत्य

धस्तादुपोक्षति सर्वत एवैनं मेध्यं करोतीति ब्राह्मणमुदुह्य प्रोक्षणीर्धानं ॥ ६ ॥ अथैध्मात्समिधमादधा
न आहाग्नये समिध्यमानायानुब्रूहीत्यभ्यादधातीध्मं परिसमिधः शिनष्टि वेदेनोपवाजयत्यनूक्तासु
सामिधेनीषु स्रुवेणाघारमाघारयति स्रुच्याघारमथास ऽस्पर्शयन्स्रुचावुदङ्ङत्याक्रम्य जुह्वा प
शुं समनक्ति सं ते प्राणो वायुना गच्छतामिति ललाटे संयजत्रैरङ्गानीति कट्योः संयज्ञपतिराशिषेति
दक्षिणस्यां श्रोण्यामथ यथायतनं स्रुचौ सादयित्वा प्रवरं प्रवृणीतेऽथाश्रावयास्तु श्रौषडग्निमित्रावरुणौ प्र
शास्तारौ प्रशास्त्रादित्य सौमानुष इति मैत्रावरुणस्य ना × प्रसिद्धं होतारं वृणीते × मनूल्लोस्यथात्याश्राव
ह यति यद्यत्वात्याश्रावयत्याश्रावयास्तु श्रौषडग्निर्दैवीनां विशां पुर एतायं यजमानो मनुष्याणां तयोरस्तू
रिगार्हपत्यं दीदयच्छतं हिमा द्वायू राधांसीत्संपृञ्चानावसंपृञ्चानौ तन्व इति सीदति होता प्रसवमाक्षो स
ति प्रसृतः स्रुचावादायात्याक्रम्याश्राव्याह समिधः प्रेष्येति वषट्कृते जुहोति प्रेष्य प्रेष्येति रतुर्थाः समयोः
समानयमानो ऽयमेस्त्वर्वं समानयते परिस्वाहाकृतीभ्यः सं स्रावं ब्रिन लिप्तनुयाजेभ्यो दक्षप्रयाजानि
ह्लोदङ्ङत्याक्रम्यास्तरणं च शासं च याचतितो जुह्वोमंत्कालान्यां पशुं समनक्ति घृतेनाक्तौ पशुं त्रायेथामिति
प्रयच्छति शासमवगूहति स्वरुमथ यथायतनं स्रुचौ सादयित्वा ॥ ७ ॥ पर्यग्नये क्रियमाणायानुब्रूहीत्य
थैष आग्नीध्र आहवनीयादुल्मुकमादायांतरेण चात्वालोत्करौ दक्षिणतः शामित्रदेशमग्रेण प वंशघ
नेन स्रुवं इत्येवं त्रिः प्रदक्षिणं पर्यग्न्यथानुपारसरणमपा आनिजुहोति प्रज्ञानं तत्प्रति गृह्णाति पूर्वेये

यामीशेपशुपतिःपशूनां ये बध्यमानामनु बध्यमाना य आरण्याः पशवो विश्वरूपाः प्रमुंचमाना भुवनस्य रे
तइत्ति निधायाग्नीध्र उल्मुकं यथेतं त्रिः पुनः पर्यग्निं थोल्मुक प्रथमाः प्रतिपद्यंतेन्वकु शमिता पशुना पश्चे
मध्वर्युर्वपाश्रपणीभ्यामन्वारभते वपाश्रपणी यजमानो ध्वाश्राव्य संप्रेष्यत्युपप्रेष्य होतर्हव्या देवेभ्य इत्य
थैतं पशुमंतरेण चात्वालोत्करावुदंचं नीयमानमनुमंत्रयते नानाप्राणो यजमानस्य पशुनाऽरेवतीर्यज्ञप
तिं प्रियधाविशतेति द्वाभ्यां यत्रैतदाग्नीध्र उल्मुकं निदधाति तद्दक्षिणेन वोत्तरेण वा पशवे निहन्यमानाय बर्हि
रुपास्यति पृथिव्याः संपृचः पाहीति तदेतं पशुं प्राक्शीर्षिणं शिरस मुदीचीनपदं निघ्नंत्य कूणंतमायुं संज्ञप
यते स्फ्येनैव यथेतमेत्य यूपदाड्या वकाश आसते ॥ ८ ॥ दूरश्च गा विश्वरूपा रमंतामस्मिन्यज्ञे विश्व
विदो घृताचीः । अग्निं कृत्वा यमभि संवसाना अस्मा स्वस्त्र बंधुपयसा घृतेनेति संज्ञप्तं प्राकुर्जुहोति संज्ञ
प्तां कृतिं यत्पशुर्मायुमकृतेत्यथाभ्येति शमितारं उपेतनेति पाशात्पशुं प्रमुच्यमानमनुमंत्रयते दितिः
पाशं प्रमुमोक्त्वेतमित्यविशाखयोपासज्ये मां दिशं निरस्यत्यरातीयंतमधरं कृणोमि यं द्विष्मस्तस्मिन्प्र
तिमुंचामि पाशमित्यथ प्रतिप्रस्थाता पत्नीमुदानयत्युदकमंडलुमुच्छ्राप्याथैनामादित्यमुदीक्षयति न
मस्त आतानेत्यथैनामंतरेण चात्वालोत्करावुदङ्ङुपनिष्क्रमय्य प्राचीमुदानयन्त्यावयत्यनर्वा प्रेहि घृ
तस्य कुल्यामनु सह प्रजया सह रायस्पोषेणेत्यागतमध्वर्युरस्कम्बावयत्यापो देवीः शुद्धायुवः शुद्धा
यूयं देवाँ उद्धृ शुद्धा वयं परिविष्टाः परिवेष्टारो भूयास्मेति सानुपूर्वं पशोः प्राणानाप्याययति वाक्ते
आप्यायतामिति प्राणं चक्षुस्त आप्यायतामिति चक्षुः श्रोत्रं त आप्यायतामिति श्रोत्रमेतानेव पुनः

संमृशति या ते प्राणाञ्छुग्जगाम या चक्षुर्या श्रोत्रं यत्ते क्रूरं यदास्थितं तत्त आप्यायतां तत्त एतेन शुंधतामिति ना
भिस्त आप्यायतामिति नाभिं पायुस्त आप्यायतामिति पायुं संप्रगृह्य पदः प्रक्षालयति शुद्धाश्चरित्राः शमद्भ्यः
शमोषधीभ्यः शं पृथिव्या इति शमहोभ्यामित्यतिशिष्टाद्दक्षिणतो रूपष्ठं विनयति नयंति पत्नीमुन्नानं पशुं
पर्यस्यंति तस्य दक्षिणस्य पार्श्वस्याविदूरतमनु प्राचीनाग्रं बर्हिर्निदधात्योषधे त्रायस्वैनमिति स्वधितिं तिर्यं
चं निदधाति स्वधिते मैनं हिंसीरिति छिनत्ति बर्हिर्बिल्वं कृणत्यथैतस्यै बर्हिषोऽग्रमत्स चैतस्थविमदुग्र
यतो लोहितेनाक्ते मां दिशं निरस्यति रक्षसां भागोसीदमहं रक्षो धमं तमानया मियो स्मान्द्वेष्टि यं च वयं
द्विष्म इदमेनमधमं तमो नयामीत्यथापउपस्पृश्य वरीय आच्छाद्यवेत्विति वपामुत्खिदति तया वपा
श्रपण्यौ प्रोर्णोति घृतेन द्यावापृथिवी प्रोर्णुवाथामित्यविशाखयोपमृद्य यस्तात्यभिवासयत्याछिन्नो रा
यः सुवीर इत्यथैनां प्रदक्षिणमावृत्याद्भिरभ्युक्ष्य शमित्रे प्रतितपत्यथोल्मुकप्रथमाः प्रतिपद्यंते ॥
॥ ९ ॥ अन्वगध्वर्युर्वपया त्र वपाश्रपणी पुनरन्वारभते यजमान एत्युवंतरिक्षमन्विहीत्येत्याहवनीयस्यां
तमेधे गारेऽधिवपायै प्रतितप्यमानायै बर्हिषोऽग्रमुपास्यति वायो वीहि स्तोकानामित्यथैनामंतरेण यूपं
चाहवनीयं चोपातिहृत्य दक्षिणत उदङ्ङुरकः प्रतिप्रस्थाताऽप यत्स्यैनत्स्रुवाकुल्या मिजुहोतीत्याशुते
दधिरे हव्यवाहमित्यथाह स्तोकेभ्योऽनुब्रूहीति पारहितास्सुक्तोकीयासुभ्रुतायां वपायां जुहूपभृता वादा
यात्याक्रम्याश्राव्याह स्वाहाकृतीभ्यः प्रेष्येति वषट्कृते जुहोत्यथोदङ्ङत्याक्रम्य स्रुवेण पृषदाज्यमभिघा
र्य वपामभिघारयत्युपोपस्तीर्य द्विः स्रुवेण वपायै समवद्युपलाहेंद्राग्निभ्यां छागस्य वपाया मेदसो वह
यमानस्यानुब्रूहीति द्विरभिघारयत्यत्याक्रम्याश्राव्याहेंद्राग्निभ्यां छागस्य वपां मेदः प्रस्थितं प्रेष्येत्य

थपुरस्तात्स्वाहाकृतीः स्रुवाहुतिं जुहोति स्वाहा देवेभ्य इति वषट्कृते वपां जुहोति जातवेदो वपया गछ देवान्त्वा
ꣳ हीत्यथोपरिष्टाद्देवेभ्यः स्वाहेत्यत्र वपाश्रपणी अनुप्रहरति प्राचीं विशाखां प्रतीचीमविशाखाꣳ स्वाहोर्ध्वन
भसं मारुतं गछतमित्यथैनेसꣳस्रावेणाभिजुहोत्यथो दृष्ट्वाक्रम्य यथायतनꣳ स्रुचौ सादयित्वा समुत्क्र
म्य चात्वाले मार्जयन्ते ह्वयन्ति पत्नीꣳ ह्वयन्ति होतारꣳ ह्वयन्ति प्रतिप्रस्थातारꣳ ह्वयन्ति प्रशास्तारꣳ ह्वयन्त्या
ग्नीध्रमिदमापः प्रवहतावद्यं च मलं च यत्। यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणं। निर्मा मुञ्चामि शपथान्नि
र्मा वरुणादुत निर्मा यमस्य पड्बीशात्सर्वस्माद्देवकिल्बिषादथो मनुष्यकिल्बिषादथाञ्जलिनाप उपहन्ति सु
मित्रा न आप ओषधयः सन्त्विति तां दिशं निरस्यति यस्यामस्य दिशि द्वेष्यो भवति दुर्मित्रास्तस्मै भूयासुर्
योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथ यथापरेतं प्रत्येत्य यथायतनमुपविशन्ति ॥ १० ॥ अथ सम्प्रेष्यमाहाग्नीत्प
शुपुरोडाशं निर्वपेति प्रतिप्रस्थातः पशुं विशाधीति निर्वपत्येष आग्नीध्र ऐन्द्राग्नमेकादशकपालमथ प्रति
प्रस्थाता पशुं विशास्ति शमितर्हृदयं जिह्वां वक्षस्तान्यभिसार्धं कुरुतात्तनिममतस्नौतानि सार्धं सव्यं दोरे
कधरं कुरुतान्नानापार्श्वे अवद्यताद्दक्षिणां श्रोणिमध्युद्धिं कुरुताद्दक्षिणं दोः सव्याꣳ श्रोणिमलिमलुत्स
तानि त्र्यङ्गाणि कुरुताद्वनिष्टुं वजं घनीं चावद्यताद्गुदं भूरं कुरुतात्त्रिः पशुं प्रच्यावयतात्त्रिः प्रच्युतस्य पशो
र्हृदयमुत्तमं कुरुताद्धितिश्रते पशौ पशुपुरोडाशं यावति तमुपस्तीर्णाभिघारितमुद्वास्यासं वेद्यां सा
दयन्त्यथ जुहूपभृतौ उपस्तृणान आहेन्द्राग्निभ्यां पुरोडाशस्यावदीयमानस्यानुब्रूहीति पूर्वार्धादवदाया
परार्धादवद्यत्यभिघारयति प्रत्यनक्त्यथोपभृति स्विष्टकृते सकृदुत्तरार्धादवद्यति द्विरभिघारयति न प्र
त्यनक्त्यत्याक्रम्याश्राव्याहेन्द्राग्निभ्यां पुरोडाशं प्रस्थितं प्रेष्येति वषट्कृते जुहोत्यथ समवपमान आह

ग्नये स्विष्टकृतेऽनुब्रूहीत्याश्राव्याहाग्नये प्रेष्येति वषट्कृत उत्तरार्धपूर्वार्धेतिहाय पूर्वा आहुतीर्जुहोत्यथोद
ङ्त्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा प्राशित्रमवदायेडामवद्यत्युपहूतायामिडायामग्नीध आदधाति
षडवत्तं प्राश्नन्ति मार्जयन्ते ॥ ११ ॥ अथ सम्प्रेष्यमाहाग्नीदुत्तरबर्हिरुपसादय प्रतिप्रस्थातः पशोः संवदस्वेत्य
थैष आग्नीध्रः प्लक्षशाखायामिडसूनमुपगूहति तदुत्तरबर्हिष्यवदधात्यथ प्रतिप्रस्थाता पृषदाज्यं विहृत्य
गुदकाण्डꣳ समानीयान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य पृच्छति शृतꣳ हवीः शमितरिति शमितेत्युत्तरतो
हृदयशूलं धारयꣳस्तिष्ठति शृतमित्येव प्रत्याहतं तथैव द्वितीयमुत्क्रम्य पृच्छति तं तथैवेतरः प्रत्याह तं तथै
व तृतीयमुत्क्रम्य पृच्छति तं तथैवेतरः प्रत्याहाथ शमितहृदयशूलमादाय तेन हृदयमुपतृणत्त्यथ शमित्रे सं
प्रदाय पृषदाज्येन हृदयमभिघारयति सं ते मनसा मनः सं प्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवत्स्वाहेति पृ
षत्कृत्वाहरत्येतस्मिन्नेव यथेतमेत्य चत्वालरूपस्तृणाते जुहूपभृतौ रिडाधाने यस्मिꣳश्च वसाहोमं ग्रहीष्य
न्भवति आहरत्येतं पशुमन्तरेण चात्वालोत्करावन्तरेण यूपं चाहवनीयं चोपातिहृत्य तं दक्षिणतः पञ्चहोत्रा
सादयत्येतेनैव पूर्वाहरन्त्येतेनेडसूनमथ प्लक्षशाखायाꣳ हृदयं निधाय स्वधितिना तस्याग्रेवद्यत्याह ।
॥ १२ ॥ मनोतायै हविषोऽवदीयमानस्यानुब्रूहीति हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसोऽथ तनि
म्नोऽथ मतस्नयोरथ सव्यस्य दोष्णोऽथ दक्षिणस्य पार्श्वस्याथ सव्यस्याथ दक्षिणायै श्रोणेरथ गुदस्य त्रे
धं गुदं कृत्वाणिमत्स्विष्टकृते निदधाति स्थविमदुपयड्भ्यो मध्यं दैवं कृत्वा जुह्वामवदधाति अथ वङ्क
मेदो यूपस्तरणवधायतेनमुक्षं प्रोर्णोतीत्युपस्तीर्णां द्विरथाभिघारयत्यथोपभृति स्विष्टकृते सर्वेषां त्र्य
ङ्गाणां सकृत्सकृत्समवद्यति सकृद्दक्षिणस्य दोष्णः पिशितं प्रच्छिद्यावदधाति सकृत्सव्यायै श्रोणे

बो॰सं॰ ६ पशु॰

रणिम जुहुस्याथ वंक्रमेदो मूष्णल्लव धायतेनोपभृतं प्रोर्णोति पूलोपसिं वनिद्विरभिघारयत्यथ हृदयं श्रि
क्तां वत्तस्त नि मम तस्लो वनिष्ठु मितिपाश्यों सम वधाय पूलो पसिं वत्यथाभिघारयत्यथ कं सेवासम
से वा वसाहो मंग ल्लोति पूलो पसिं वत्यथाभिघारयत्यथ पशोरवदानानि संमृशत्येंद्रः प्राणो अंगे अंगे
निदध्यदैंद्रोपानो अंगे अंगे निवीतु वद्देवत्वष्टर्भूरितेसं समेतु विष्णु रूपाय त्सल क्ष्मणोभवथदवत्रायंत
मवसेसरखायो नुत्वामातापितरोमदंत्वित्यथ दक्षिणेन पार्श्वेन वसाहोमं प्रयौति ऊं वतः श्री रस्य भिस्त्वा
श्रीणात्वापः समरिणन्वातस्य त्वाध्रज्यै पूष्णो रं ह्या अपामोषधीनां रोहिष्या इति संमृष्टस्य पशोः प्रती
चीनाघनीं हरंति प्रतिपरिहरंति पशुमथ जुहूपभृतावादाय न आहेंद्राग्निभ्यां छागस्य हविषोनुब्रूहि
त्यत्याक्रम्याश्राव्याहेंद्राग्निभ्यां छागस्य हविः प्रस्थितं प्रेष्येति प्रतिप्रस्थातेष वसवसाहोमं धारयं स्ति
ष्ठति सोर्ध वैया ज्यायेव साहोमं जुहोति दिशः प्रदिश आदिशो विदिश उद्दिशः स्वाहा दिग्भ्यो नमो दिग्भ्य इ
त्यथ प्रदक्षिणमावृत्य पृषदाज्यात्कव णोपघ्नाह वनस्पतये नुब्रूहीत्याश्राव्याह वनस्पतये प्रेष्येति व
षट्कृत उत्तरार्धपूर्वार्धे तिहायपूर्वा आहुती र्जुहोत्यथ समाव पमाने आहाग्नये स्विष्टकृते नुब्रूहीत्याश्रा
व्याहाग्नये स्विष्टकृते प्रेष्येति वषट्कृत उत्तरार्धपूर्वार्धे तिहायपूर्वा आहुती र्जुहोत्यथोदङ् त्याक्रम्य यथा
यतनं स्रुचौ सादयित्वा होत्र इडामुपोद्य छंतेमद्य उपहूता यामिडायाम ग्नीध आदधाति षडवत्तमर्ध
वनिष्ठुमथार्धवनिष्ठुं मेदस्तत्प्राश्नंति मार्जयंते थाह ब्रह्मणे वन्दाम्परिहरेति तद्ब्रह्मा प्रतिगृह्णाति ॥१२॥
वयं सोम व्रते तव मनस्तनूषु बिभ्रतः प्रजावंतो अशीमहीत्यथ संप्रेषमाहाग्नीदुपयजानंगारानाा
हरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्याह दस्यैतां ताभि

ग्नीदोपयजानंगारांः स्तानयेण होतारं मिव पत्न्यपसीदत्युपयष्टा गुदतृतीयेना ध्रुवः एवदाऽपं विहत्य
गुदकाः समानीयात्याक्रम्याश्राव्याह देवेभ्यः प्रेष्येति वषट्कृते जुहोति प्रेष्य प्रेष्येत्येवमेवोपयष्टोपयजतिगु
दस्य प्रष्ठिदं स मुद्रं गच्छ स्वाहेत्येतैरेकादशभिरग्निं वैश्वानरं गच्छ स्वाहेति सर्वमंततो जुहुहरत्यथ वहिष्ठि
हस्तो निमार्ष्ट्यपस्त्वोषधीभ्यो मनो मे हार्दियच्छेत्यथास्य धूममन्वीक्षते तनूं त्वचं पुत्रं नप्तारमशीयेत्य
रशानुयाजानिष्ट्वा दङ् त्याक्रम्य जुह्वा स्वरुमवधाय पुरस्तात्प्रत्यग्निष्ठं जुहोति दिवं ते धूमो गच्छत्वं
तरिक्षं ज्योतिः पृथिवीं भस्मना पृण स्वाहेत्यथ यथायतनं स्रुचौ सादयित्वा वाजवतीभ्यां स्रुचौ
पुनाप्रस्त्तरपरिधी संप्रकीर्य संप्रस्राव्य स्रुचौ विमुच्य जाघन्या पत्नीः संयाजयंत्याज्यस्यै
वां यजवपुल्लनाये जाघन्ये देवानां पत्नीर्यजति नीच्याग्निं गृहपतिमुत्तानायै जाघन्यै
यतिनीच्या ग्नीधषडवत्तं प्राश्नीतो मार्जयेते थ स्रुचि वलुर्गृहीतं गृहीत्वा पसलैः पर्या हत्य
वं ने प्रापा तं कृत्वा फलीकरणहोमेन चरत्यथ प्राङेत्य ध्रुवामाप्यायय त्रीणि पाशुबंधिक
क्कं स्यि जुहो तिय ज्ञय ज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहेति स्रुवेणेव ह्रुतीयमेषां तयत्तो यज्ञ
वाकः स्रुवीर हेति स्रुवाहुतीं यदेवा गातुविदो गातुं वित्वा ० स्वाहा वाते धा स्वाहेत्युदूहति
तिस्पामुदपात्रं हृदयशूलमित्येतत्समादायाहेहि यजमानेत्य यजमानो पत्न्यंतरे ए
बुदङ्ङु पनि येण यूपं स्पृश्नो हृदयाकेस्यस्य चास्य
सत मार्जि शोव स्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाग्निमीडीयं ते

बौ. [illegible]शयामहे ततो व[illegible]र्वेस्य[illegible]तान्समाय [illegible] पशु. ६

अग्निं यावत्कल्पो[illegible] एवं वाहवनीयेभ्याद्धा[illegible]मिदसि तेजोसि तेजो[illegible]य रु[illegible]स्पा[illegible]

स्पृथिवी महीसे[illegible] [illegible]प्रत[illegible] हृदयं[illegible]

अन्वेवारिषद॰ प्रतानसमस्त्वमहि वयस्त्वा॰ अग्न आगमंतं मा सं॰सृज वर्चसा[illegible]पयाज[illegible]पिवाचम

यत्कुसीदमप्रती[illegible] मयि येन यमस्य बलिना चरामि इहैव सन्निरवदयेतदे[illegible]अन[illegible]णो भवा[illegible]गे अंगे

नोपसीर्णा[illegible]पाते घारितान्सकृ[illegible]दानेजुहोति विश्वलोप विश्वदाव स्यत[illegible] संजुहोति स्वाहेति हस्तौ [illegible]वचायंत

देकोऽजतादेवयो:समसनादेक: तेन ऋण्वंतु मेयज॰ सद: सद्दो वरेण्यमिति द्वितीयंजुहोति यान्यपामित्या[illegible]प्रती

यमस्य बलेन[illegible]चरामि इहैव संत: प्रतित द्यानयामोजीवाजीवे भ्यो नि[illegible]मएनत्स्वाहेतिह[illegible]सोऽध[illegible]जुहो

[illegible]समसा[illegible]के: तेन: ऋण्वंतु मेयज॰ सद:सद्दो वरेण्यमितितृतीयंजुहोत्यनृणा अस्मिन्ननृणा[illegible]स्य[illegible]ति

लोके अनृणा: स्याम: ये देवया नाउत पित्र्याणा: सर्वान्पथो अनृणा आक्षीयमस्वाहेतिह[illegible]तोप्रधुंसयते[illegible]

वरेण्यमित्यथ देवता उपतिष्ठते य[illegible]नो नमसा पुरइत्यग्निं॰ स त्वं नो अग्ने नमसस्पत इति वायुं देव[illegible] सं॰ सवि

दित्यमथ देवता रूपमुपतिष्ठत आशासानः सुवीर्यं॰ रायस्पोषं॰ स्वश्विय॰ बृहस्पतिना राया स्वगा कृतो

यजमानाय तिष्ठेत्यथ पूर्वाग्निं॰ शकलेसमारोपयत्ययं ते योनिर्ऋत्विय इति तं मध्यमेन्नावपि सृजस्वा[illegible]

न उद्बुध्यस्वाग्न इति द्वाभ्यामथ मध्यममग्निमुपसमाधाय मध्यमे ग्नौ पूर्णाहुतिं जुहोति सप्तते अग्ने समिध:

सप्तजिह्वा इति पूर्णाहुतौ वरं ददाति धेनुं वरं वा धेनुं वरं वा दद्यादिति हस्माह बौधायन: संतिष्ठते पशुबंध: संति

ष्ठते पशुबंध:॥१५॥ ॥ ॥इति बौधायनीयपशुसूत्रं॥ ॥वैश्वदेवहविर्भिर्यक्ष्यमाणो भवति॥ ॥